हताशाभक्तैर्वदनपरिपाटीषुघटना
मयाप्तं रामत्वं कुशलवसुता न त्वधिगता ॥”
कनकस्य सुवर्णस्य मृगे चान्वेषणे । पक्षे । कनकमृगे हेमहरिणे या तृष्णा इत्यर्थः । ) याच्ञा । इति मेदिनी । णे, १८ ॥ मार्गशीर्षमासः । यज्ञविशेषः । इत्यजयपालः ॥ मृगनाभिः । इत्यमरटीकायां भरतः ॥ मकरराशिः । यथा,—

“मृगकर्कटसंक्रान्ती द्वे तूदग्दक्षिणायने ।
विषुवती तुलामेषे गोलमध्ये तथापराः ॥”
इति तिथ्यादितत्त्वम् ॥

स्वनामख्यातपशुविशेषः । मृग्यते अन्विष्यतेऽसौ व्याधैः । ( यथा, अभिज्ञानशाकुन्तले । १।१० ।
“न खलु न खलु बाणः सन्निपात्योऽयमस्मिन्
मृदुनि मृगशरीरे तूलराशाविवाग्निः ।”)
तत्पर्य्यायः । कुरङ्गः २ वातायुः ३ हरिणः ४ अजिनयोनिः ५ । इत्यमरः ॥ शारङ्गः ६ चारुलोचनः ७ जिनयोनिः ८ कुरङ्गमः ९ ऋष्यः १० ऋक्षः ११ रिष्यः १२ रिश्यः १३ एणः १४ एणकः १५ । इति शब्दरत्नावली ॥ स नवविधः । यथा,—

“सम्बरो रोहितो न्यङ्कुः कुरङ्गसदृशो रुरुः ।
एणश्च हरिणश्चेति मृगा नवविधा मताः ॥
पाठान्तरं यथा,—
“समूरु रोहितो न्यङ्कुः सम्बरो बभ्रुणो रुरुः ।
शशैणहरिणाश्चेति मृगा नवविधा मताः ॥
हरिणश्चापि विज्ञेयः पञ्चभेदोऽत्र भैरव ! ।
ऋष्यः खड्गी रुरुश्चैव पृषतश्च मृगस्तथा ।
एते बलिप्रदाने च चर्म्मदाने च कीर्त्तिताः ॥”
इति कालिकापुराणे ६७ अध्यायः ॥ * ॥

अपि च । अथ जाङ्गलानां गणना ।
“हरिणैणकुरङ्गर्ष्यपृषतन्यङ्कुसम्बराः ।
राजीवोऽपि च मुण्डी चेत्याद्या जाङ्गलसंज्ञकाः ॥
हरिणस्ताम्रवर्णः स्यादेणः कृष्णः प्रकीर्त्तितः ।
कुरङ्ग ईषत्ताम्रः स्याद्धरिणाकृतिको महान् ।
ऋष्यो नीलाङ्गको लोके सरोहृरिति कीर्त्तितः ।
पृषतश्चन्द्रबिन्दुः स्याद्धरिणात् किंयदल्पकः ॥
न्यङ्कुर्बहुविषाणोऽथ शम्बरो गवयो महान् ।
राजीवस्तु मृगो ज्ञेयो राजीभिः परितो वृतः ।
यो मृगः शृङ्गहीनः स्यात् स मुण्डीति निगद्यते ॥”
अथ तेषां गुणाः ।
जाङ्गलाः प्रायशः सर्व्वे पित्तश्लेष्महराः स्मृताः ।
किञ्चिद्वातकराश्चापि लघवो बलवर्द्धनाः ॥”
इति भावप्रकाशः ॥

अथ मृगपरीक्षा ।
“मृगनाभिं समादातुं कौतुकार्थं तथा पुनः ।
मृगाः पोष्या महीन्द्राणां तेषां वक्ष्यामि, लक्षणम् ॥
पृथिव्यब्वायुगगनास्तेजोऽधिकास्तु पञ्चधा ।
भिद्यन्ते नैकभेदास्तु समस्ता मृगजातयः ॥”
तद्यथा,—
‘ये गन्धिनः क्षीणशरीरकर्णा-
स्ते पार्थिवा गन्धमृगाः प्रदिष्टाः ।
सर्व्वाङ्गमेषां सुरभि प्रकामं
पुण्ये प्रदेशे प्रभवन्ति ते तु ॥
ये वै विशाला गुरुदीर्घशृङ्गा
घमांसलास्तीक्ष्णखुरप्रदेशाः ।
आप्यास्तु ते वै प्रसरन्ति भूरि
सर्व्वत्र देशे प्रभवन्ति चैव ॥
धावन्ति ये वातमिवाम्बरोक्षे
दीर्घास्तु ते वातमृगाः प्रदिष्टाः ।
ते यत्र यत्रैव भवन्ति शक्ता-
स्तत्रैव सर्व्वाणि शुभानि सन्ति ॥
लघुप्रमाणा लघुवीर्य्यसत्त्वा
निर्गन्धदेहाश्छगलप्रमाणाः ।
ते गागना वेगकरा नराणां
दृश्या न ते नापि निरीक्षणीयाः ॥
ये कृष्णवर्णा गुरुदीर्घशृङ्गाः
क्रुद्धा भृशं यान्ति च वायुवेगाः ।
ते कृष्णसाराः खलु तैजसास्तु
पुण्यप्रदेशे प्रभवन्ति ते तु ॥’
भोजोऽप्याह ।
‘पार्थिवादिर्मृगः सर्व्वश्चतुर्जातिर्भवेत् पृथक् ।
सुशृङ्गास्तनुलोमानो ब्राह्मणा मृगजातयः ॥
क्रुद्धाः पञ्चरिशृङ्गाश्च क्षत्त्रियाः खरलोमशाः ।
आवर्त्तशृङ्गास्तनवो हरिणा वैश्यजातयः ॥
कुशृङ्गा वाप्यशृङ्गा वा शूद्राः खरतनूरुहाः ।
अश्वानां ये गुणा दोषास्ते ज्ञेया हरिणेष्वपि ॥
तथापि दोषाः पञ्चामी वक्ष्यन्ते हरिणाश्रयाः ।
नेत्रयोरन्तरे यस्य लोमावर्त्ताः स पापकृत् ॥
विषमौ विकृतौ शृङ्गौ यस्य स क्षेमनाशनः ।
आवर्त्तः पृष्ठतो यस्य स्वानाभिमभिविन्दति ॥
पश्चार्द्धे यस्य चावर्त्तौ त्याज्यौ भयकारकौ ।
सर्व्वनेत्रपदादीनां वेत्रताड़ननाशनः ॥’
गार्ग्यः ।
‘दोषवन्मृगजातीनां विजातीनामथापि वा ।
दर्शनात् स्पर्शनाच्चैव गन्धादानाच्च पोषणात् ।
भवेयुर्व्विपदः सर्व्वास्तथा चैवाद्यपोषणात् ॥’
शक्रोऽपि ।
‘हरिणपोषणतो धरणीभुजां
नहि भवेन्मरुदुद्भवपीड़नम् ।
न पविवह्निरुजारिपुजं भयं
तदव तं हरिणं गुणिनं नृप ! ॥’
इति मृगपरीक्षा ॥ इति युक्तिकल्पतरुः ॥
( अस्य गुणविशेषो यथा,—
“दूरे जनान्तनिलया दूरे पानीयगोचराः ।
ये मृगाश्च विहङ्गाश्च तेऽल्पाभिष्यन्दिनो मताः ॥
अतीवासन्ननिलयाः समीपोदकगोचराः ।
ये मृगाश्च विहङ्गाश्च महाभिष्यन्दिनस्तु ते ॥”
इति सुश्रुते सूत्रस्थाने ४५ अध्यायः ॥)
मृगादिविकारोपशमो यथा,—
गर्ग उवाच ।
“प्रविशन्ति यदा ग्राममारण्या मृगपक्षिणः ।
अरण्यं यान्ति वा ग्राम्याः स्थलं यान्ति जलोद्भवाः ॥
स्थलजाश्च जलं यान्ति घोरं रासन्ति निर्भयाः ।
गृहं कपोतः प्रविशेत् क्रव्यादो मूर्द्ध्नि नीयते ॥
मधु वा मक्षिकाः कुर्य्युर्मृत्युं गृहपतेर्वदेत् ॥
मृगपक्षिविकारेषु कुर्य्याद्धोमं सदक्षिणम् ।
देवाः कपोते इति च जप्तव्याः पञ्चभिर्द्विजैः ॥
गावश्च देया विधिवत् द्विजानां
सकाञ्चना वस्त्रयुगोत्तरीयाः ।
एवं कृते शान्तिमुपैति पापं
मृगैर्द्विजैर्व्वा विनिवेदितं यत् ॥”
इति मात्स्ये २११ अध्यायः ॥

चतुर्व्विधपुरुषमध्ये पुरुषविशेषः । तस्य लक्षणं यथा,—
वदति मधुरवाणीं दीर्घनेत्रोऽतिभीरु-
श्चपलमतिसुदेहः शीघ्रवेगो मृगोऽयम् ।
“शशके पद्मिनी तुष्टा मृगे तुष्टा च चित्रिणी ।
वृषभे शङ्खिनी तुष्टा हये तुष्टा च हस्तिनी ॥
पद्मिनीशशयोर्योनिमेढ्रकौ चतुरङ्गुलौ ।
चित्रिणीमृगयोर्योनिमेढ्रकौ च तथाविधौ ॥”
इति रतिमञ्जरी ॥
( अन्वेष्टा । यथा, ऋग्वेदे । १ । १५४ । २ ।
“मृगो न भीमः कुचरो गिरिष्ठाः ।”
“मृगः अन्वेष्टा ।” इति तद्भाष्ये सायणः ॥)

मृगक्षीरं, क्ली, मृगीदुग्धम् । तरादौ चेति चकारस्यानुक्तसमुच्चयार्थत्वात् मृग्याः क्षीरं मृगक्षीरं मृग्याः पदं मृगपदं इत्यादिष्वपि पुंवद्भावः । इति मुग्धबोधटीकायां दुर्गादासः ॥

मृगगामिनी, स्त्री, (मृग इव गच्छतीति । गम + णिनिः । ङीप् ।) विड़ङ्गा । इति राजनिर्घण्टः ॥ मृगसदृशगमनशीला च ॥

मृगचर्म्मजं, क्ली, ( मृगचर्म्मात् मृगनाभिचर्म्मात्, मृगगन्धवत् जायते इत्यर्थः । जन + डः । ) जवादिनामकगन्धद्रव्यम् । इति राजनिर्घण्टः ॥ मृगचर्म्मजाते, त्रि ॥

मृगचेटकः, पुं, ( मृगान् पशून् चेटयति प्रेरयति स्वशब्देन रात्रिशेषं ज्ञापयतीति । चिट् + णिच् + ण्वुल् । ) खट्टासः । इति शब्दमाला ॥

मृगजालिका, स्त्री, ( मृगाणां जालिका । ) मृगबन्धनार्थजालम् । तत्पर्य्यायः । वागुरा २ । इति हेमचन्द्रः । ३ । ५९२ ॥

मृगजीवनः, पुं, ( मृगैः पशुभिः जीवतीति । जीव + ल्युः । ) व्याधः । इति शब्दरत्नावली ॥ (यथा, महाभारते । ३ । ६३ । २८ ।
“निर्विचेष्टं भुजङ्गं तं विशस्य मृगजीवनः ।”)

मृगणा, स्त्री, ( मृग + युच् । ) अपहृतद्रव्यस्यान्वेषणम् । यथा,—
“संवीक्षणं विचयनं मार्गणं मृगणा मृगः ।”
इत्यमरः । ३ । २ । ३० ॥